In Public domain. Digitization Muthulakshmi Research Academy

णत्वणिजन्तम्

• जनार्दनहेगडे

संस्कृतभारती
बेङ्गलूरु



In Public domain. Digitization Muthulakshmi Research Academy

म्. अरविन्द, शिव.

In Public domain. Digitization Muthulakshmi Research Academy

C.S.S.

प्रस्तावना

(प्रथममुद्रणस्य)

णत्वं णिजन्तं चेति विषयः बहुभिः श्रुतः भवति । तत्सम्बद्धानि सूत्राणि कदाचित् पठितानि स्युः अपि । तथापि तत्तद्विषये निर्णये ते क्लेशम् अनुभवन्ति, स्पष्टस्य मार्गस्य ज्ञानस्य अभावात् प्रमादं कुर्वन्ति वा । एतादृशान् मनसि निधाय एतत् लघुपुस्तकं रचितम् । सूत्रसंस्कारं किञ्चित् ये प्राप्तवन्तः ते एतस्य पुस्तकस्य अधिकारिणः ।

णत्वं णिजन्तं च अत्र व्यावहारिकदृष्ट्या निरूपितम् । व्यवहारः कदापि व्याकरणनियमबहिर्भूतः न भवति इत्यतः अत्रत्यं निरूपणं व्याकरणनियमानुगुणम् अस्ति इति न पुनर्वक्तव्यम् । अभ्यासेन एव विषयस्य स्वाधीनत्वं सिद्ध्यति इत्यतः पर्याप्तमात्रेण अत्र अभ्यासाः अपि प्रदत्ताः । अभ्यासेषु सोपानक्रमः आश्रितः । परिशिष्टे णत्वस्य व्याप्तिः, व्यवहारोपयोगीनि कानिचन सूत्राणि च दत्तानि । पुस्तकस्य अन्ते दत्तानि उत्तराणि, स्वेन लिखितम् उत्तरं सम्यक् अस्ति वा न वा इति ज्ञातुं सहायकानि भवन्ति ।

मुद्रणालयकाराय, तत्सहकारिभ्यः, अक्षरसंयोजनं कृतवते श्रीमते प्रसादाय च वयं कृतज्ञतां समर्पयामः ।

श्रीमुख सं।। पुष्यकृष्णचतुर्थी — प्रकाशकः

०१.०१.९४

(तृतीयमुद्रणस्य)

तृतीयं मुद्रणं यत् प्रचलति तत् महते सन्तोषाय । पुस्तकस्य उपयोक्तृभ्यः, मुद्रणालयबन्धुभ्यः, सहकृतवद्भ्यः सर्वेभ्यः च कृतज्ञताः समर्प्यन्ते सादरम् ।

सर्वधारि सं।। मार्गशीर्षपूर्णिमा — प्रकाशकः

१२.१२.२००८

In Public domain. Digitization Muthulakshmi Research Academy

प्रकाशनम् -
संस्कृतभारती
'अक्षरम्' ८ उपमार्गः, २ घट्टः
गिरिनगरम्, बेङ्गलूरु - ८५

© प्रकाशकस्य एव

प्रथमं मुद्रणम् - ९४, ५,०००
द्वितीयं मुद्रणम् - ९८, ५,०००
तृतीयं मुद्रणम् - ०८, ५,०००

मूल्यम् - रू. ७.००

मुद्रणम् -
नन्दी प्रोसेस्
त्यागराजनगरम्, बेङ्गलूरु - २८

ISBN 978-81-8820-08-6

NATWA NIJANTAM - A work book for advanced study, connected with Natwa and Nijanta, compiled by Janardana Hegde.

Publisher : **SAMSKRITA BHARATI** , 'Aksharam', 8th Cross, II Phase, Girinagar, Bangalore - 560 085.

Pages : ii + 30 Price : Rs. 7.00

Third Print : December - 2008

Printed at : **Nandi Process,** T.R.Nagar, Bangalore - 28

अनुक्रमणिका

१. णत्वम्

१.०. उपक्रमः/१
१.१. सखण्डम्/अखण्डं पदम्/१
१.२. अखण्डपदे नो णः/२
१.३. व्यवधाने सत्यपि नो णः/३
१.४.१. समस्तपदे (सखण्डपदे) नो णः/४
१.४.२. संज्ञायां नो णः/५
१.५. णत्वनिषेधः/९
परिशिष्टम्-१-णत्वम्/१०
परिशिष्टम्-२-णत्वनिषेधः/११

२. णिजन्ताः (प्रेरणार्थकाः)

२.०. उपक्रमः/१२
२.१. णिजन्ते पदव्यवस्था/१२
२.२. प्रयोज्यकर्ता & प्रयोजककर्ता/१६
२.३. प्रयोज्यकर्तुः द्वितीया कुत्र ?/१६
२.३.१. अकर्मकधातूनां णिजन्ते प्रयोज्य-कर्तुः द्वितीया/१८
२.३.२. गत्यर्थकधातूनां णिजन्ते प्रयोज्य-कर्तुः द्वितीया/१९
२.३.३. बुद्ध्यर्थकादीनां णिजन्ते प्रयोज्य-कर्तुः द्वितीया/२०
२.४. गत्याद्यर्थकभिन्नस्थलेषु तृतीया/२४

उत्तराणि - २७

In Public domain. Digitization Muthulakshmi Research Academy

१. णत्वम्

१.० उपक्रमः -

पुष्पाणि, जानाति, विकीर्णः, रामाणाम्, देवानाम् - इत्यादीनि पदानि परिशीलयन्तु भवन्तः । अत्र क्वचित् नकारः श्रूयते, क्वचिच्च णकारः श्रूयते । अतः कुत्र णकारः इति ज्ञातुं यथा शक्येत तथा अत्र अभ्याससहितं विवरणं दीयते ।

१.१ अखण्डं/सखण्डं पदम् -

णत्वज्ञानात् पूर्वम् अखण्डपद-सखण्डपदयोः अर्थ ज्ञातव्यः । अखण्डं पदं नाम असमस्तं पदम् इत्यर्थः । यथा - रामेण, अर्केण इत्यादयः । सखण्डं पदं नाम समस्तं पदं संयुक्तपदम् इति वा ।

(प्र + योगेण - अत्र 'प्र' इत्यपि पदम् एव । यत्र पूर्वपदम् उपसर्गः अव्ययं वा भवति तदपि पदम् एव ।)

अभ्यासः - १ अधोनिर्दिष्टेषु पदेषु अखण्डपदानि '✓' चिह्नेन, सखण्डपदानि च 'x' चिह्नेन च अङ्कयत ।

यथा - (i) रामेण (✓) (अखण्डं पदम् इत्यर्थः)
(ii) रामनाम (x) (सखण्डं पदम् इत्यर्थः)

१. हरीणाम् ( ) २. कपीनाम् ( ) ३. प्रयाणम् ( )
४. हरिणा ( ) ५. कालक्रमेण ( ) ६. विशेषणम् ( )
७. गृहनाम ( ) ८. प्रयोगेण ( ) ९. परिणामः ( )
१०. रागेण ( ) ११. कार्यक्रमेण ( ) १२. दर्शनम् ( )
१३. सङ्ग्रहणम् ( ) १४. कृष्णः ( ) १५. ऋणम् ( )
१६. रागरक्तेन ( ) १७. हरेण ( ) १८. कर्माणि ( )

In Public domain. Digitization Muthulakshmi Research Academy

१९. कार्यकर्तृणाम् ( ) २०. एतादृशानि ( ) २१. उदाहरणानि ( )
२२. एतादृशेन ( ) २३. पुष्पाणि ( ) २४. गुरुणा ( )

अभ्यासः - २ अधोनिर्दिष्टेषु सखण्डपदेषु खण्डद्वयं विभज्य दर्शयत ।

यथा - गुरुनाम = गुरु + नाम
प्रणामः = प्र + णामः

१. सङ्कीर्णः = ... २. शूर्पणखा= .....
३. धारानगरी = ... ४. त्रिणयनः = ...
५. सङ्कीर्तनम् = ... ६. परायणः = ...
७. नमस्कारेण = ... ८. निर्नाम = ...
९. रामायणम् = ... १०. प्रणिधानम् = ...
११. बृहन्नला = ... १२. मृगनयना = ...
१३. परिपोषणम् = ... १४. विषान्नम् = ...
१५. मृषावचनम् = ... १६. विषण्णवदनः = ...

१.२ अखण्डपदे नो णः[1]

ऋ / र् / ष् --- न = णः

ऋकारात्[2] रकारात् षकारात् वा अव्यवहितपरस्य नकारस्य णकारः भवति ।

यथा - पितृ + नाम् = पितॄणाम् ।
कीर् + नः = कीर्णः ।
पुष् + नाति = पुष्णाति ।

(ऋकारः रकारः षकारः वा नकारात् पूर्वं भवेत् एव । तदा एव णत्वं भवति

---

1. रषाभ्यां नो णः समानपदे - (पा - ८.४.१)
2. ऋकारः रेफांशयुक्तः इत्यतः सोऽपि णत्वस्य निमित्तम् एव ।

In Public domain. Digitization Muthulakshmi Research Academy

इति पर्यवसितः अर्थः । अतः ऋकार-रकार-षकाराः णत्वे निमित्तानि इति उच्यन्ते । इतः परम् एते ऋ-र-षाः निमित्तशब्देन णत्वप्रकरणे व्यवहियन्ते ।)

अभ्यासः - ३ अधोनिर्दिष्टेषु सिद्धरूपेषु निमित्तम् (ऋ/र्/ष्) आवरणे लिखत ।

यथा - कीर्णः = (र्)

१. तृष्णा ( ) २. तिसृणाम् ( ) ३. अर्णवः ( )
४. विष्णुः ( ) ५. कर्णः ( ) ६. मातृणाम् ( )
७. भ्रातृणाम् ( ) ८. मुष्णाति ( ) ९. वर्णनम् ( )

१.३ व्यवधाने सत्यपि नो णः ।*

ऋ/र्/ष् - अट् = (स्वराः + हयव्) अ इ उ ए ऐ ओ औ ह् य् व्
कुः = कवर्गः = क ख ग घ ङ
पुः = पवर्गः = प फ ब भ म
– न = ण

ऋकार-नकारयोः, रकार-नकारयोः षकार-नकारयोः वा मध्ये यदि अट्-वर्णाः कवर्गः पवर्गः वा भवन्ति तर्हि अपि नकारस्य णकारः भवति ।

यथा - रामेण (र् + आ + म् + ए + न् = ण)
वर्णेण (वर् + ग् + ए + न् = ण)
रमाणाम् (र् + अ + म् + आ + नाम् = णाम्)
अर्हेण (अर् + ह् + ए + न् = ण)

अभ्यासः - ४ अधोनिर्दिष्टेषु सिद्धरूपेषु निमित्तस्य णकारस्य च मध्ये स्थितान् वर्णान् लिखत । (यदि उदाहरणपदे ऋरषकाराः द्वित्राः दृश्यन्ते तर्हि अन्तिमः ऋकारः रकारः षकारः वा णत्वस्य निमित्तम् इति स्मर्तव्यम् । यथा - 'अन्तरिक्षेण' इत्यत्र णत्वस्य निमित्तं क्षकारस्य अङ्गत्वेन स्थितः षकारः, न तु ततः पूर्वं स्थितः रकारः ।)

---

* *अट्कुप्वाङ्नुम्व्यवायेऽपि* (पा - ८.४.२) (यद्यपि सूत्रे आङ् नुम् च स्तः तथापि तयोः अप्रसिद्धत्वात् उदाहरणानि अत्र न प्रदर्शितानि । परिशिष्टे (१० पुटे) तानि प्रदर्शितानि ।)

In Public domain. Digitization by Muthulakshmi Research Academy

यथा - नारायणः = (र् + आ + य् + अ)

१. भीषणः ( ) २. अमर्षणम् ( )
३. वर्ण्यमानम् ( ) ४. रविकिरणाः ( )
५. तक्षकेण ( ) ६. वृक्षेण ( )
७. मुनिवरेण ( ) ८. रघुरामेण ( )
९. निष्क्रमणम् ( ) १०. स्वसॄणाम् ( )
११. कार्यकर्तॄणाम् ( ) १२. इक्षूणाम् ( )
१३. आनृण्यम् ( ) १४. अन्तरिक्षेण ( )
१५. त्रिवर्षीयेण ( ) १६. प्राचार्येण ( )
१७. भिक्षुकाणाम् ( ) १८. आकर्षणम् ( )
१९. परिक्रमणम् ( ) २०. श्रवणम् ( )

१.४.१ समस्तपदे (सखण्डपदे) नो णः

पूर्वपदे *उत्तरपदे*

ऋ/र्/ष् - (अट् कुः पुः) - न = णः

पूर्वपदे स्थितात् ऋकाराद् रकारात् षकारात् वा (निमित्तात्) परस्य उत्तरपदे स्थितस्य नस्य णकारो विकल्पेन भवति, किन्तु उत्तरपदस्थितः नकारः प्रातिपदिकान्ते भवेत्, विभक्तिसम्बन्धी वा भवेत्, नुम् वा भवेत् । (उत्तरपदं कवर्गवर्णयुक्तं[1] चेत् णत्वं नित्यं, न तु विकल्पेन इति तु विशेषः ।)

यथा - अ) i) प्रातिपदिकान्तः नकारः - माष+वापिन्+औ - माषवापिणौ ।
ii) नुम्सम्बन्धी नकारः - माष+वापा+न्[2]+इ - माषवापाणि ।
iii) विभक्तिसम्बन्धी नकारः - माषवाप+इन[3] - माषवापेण ।

---

१. कुमति च ।
२. 'नपुंसकस्य झलचः' इति सूत्रेण प्रथमा-द्वितीया-बहुवचने नुम् भवति ।
३. 'टाङसिङसाम् इनात्स्याः' इति टा इत्येतस्य इनादेशः ।

In Public domain. Digitization Muthulakshmi Research Academy

आ) कवर्गवर्णयुक्तं चेत् नित्यम् - प्र+योगेण, दौर्+भाग्येण ।

(समग्रे णत्वप्रकरणे निमित्तस्य नकारस्य च मध्ये अड्वर्णैः कवर्गेण पवर्गेण च व्यवधानं सह्यते इति स्मरणीयम् ।)

अभ्यासः - ५ अधोनिर्दिष्टेषु उदाहरणेषु णत्वं प्राप्तवान् नकारः प्रातिपदिकान्तः, नुम्सम्बन्धी, विभक्तिसम्बन्धी वा इति आवरणे निर्दिशत ।

यथा - व्रीहिवापिणम् (प्रातिपदिकान्तः नकारः)

१. कार्यवाहिणी ( ) २. रविमयूखेण ( )
३. वर्षभोग्येण ( ) ४. वर्षभोगिणा ( )
५. वारिवाहाणाम् ( ) ६. हर्षभावेण ( )
७. क्षोभावहाणि ( ) ८. चक्रवाकेण ( )

१.४.२ संज्ञायां नो णः (समस्तपदे)

पूर्वपदे स्थितात् निमित्तात् परस्य उत्तरपदे स्थितस्य नस्य णकारः नित्यं भवति संज्ञायां गम्यमानायाम् ।

यथा - राम + अयनम् - रामायणम्
शूर्प + नखा - शूर्पणखा

अभ्यासः - ६ अधोनिर्दिष्टेषु उदाहरणेषु निमित्तस्य नकारस्य च मध्ये स्थितान् व्यवधायकान् वर्णान् आवरणेषु लिखत ।

उदा - रामाणाम् (र् + आ + म् + आ + न्)

१. क्षत्रियाणाम् ( ) २. ब्रह्मणः ( )
३. चित्रकर्माणि ( ) ४. वर्षणम् ( )

In Public domain. Digitization, Muthulakshmi Research Academy

५. वर्षभोग्येण ( ) ६. अर्घ्येण ( )

७. कृमीणाम् ( ) ८. माषवापाणि ( )

९. चङ्क्रमणम् ( ) १०. बृंहणम् ( )

११. नरभाग्येण ( ) १२. आश्रीयमाणम् ( )

१३. परिभवेण ( ) १४. द्रव्यव्ययेण ( )

१५. रूप्यकाणि ( ) १६. भ्रमणम् ( )

१७. भाषणम् ( ) १८. रविमयूखेण ( )

१९. चक्रभ्रमणेन ( ) २०. मुरारिणा ( )

अभ्यासः - ७ अधोनिर्दिष्टेषु पदेषु णत्वप्रतिबन्धकान् वर्णान् आवरणे लिखत ।

यथा - **दृढानि (ढ) (ढकारः प्रतिबन्धकः वर्णः इत्यर्थः)**

१. राजकीयानि ( ) २. मारीचेन ( ) ३. दर्शनानि ( )

४. मृगकुलानि ( ) ५. अभिषेचनम् ( ) ६. परिवर्तनम् ( )

७. प्रौढानाम् ( ) ८. हरिसेवनम् ( ) ९. मर्कटेन ( )

१०. परिषिञ्चनम् ( ) ११. पितृदेवानाम् ( ) १२. मर्दनम् ( )

१३. गृहस्थेन ( ) १४. भैषज्यानि ( ) १५. मूर्तीनाम् ( )

१६. प्रतिमानाम् ( ) १७. वर्धनम् ( ) १८. साम्राज्येन ( )

१९. औषधानि ( ) २०. अर्चकेन ( )

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यासः - ८ यथानिर्देशं पूरयत ।

पदम्	निमित्तम् (ऋ/र्/ष्)	व्यवधानम्	अखण्डम्/ सखण्डम्
उदा - ब्रह्मणः	र्	अ+ह+म्+अ	अखण्डम्
१. चक्राणाम्	-----	------	-----
२. समुद्रेण	-----	------	-----
३. वृकेण	-----	------	-----
४. करवस्त्राणि	-----	------	-----
५. प्रसारणम्	-----	------	-----
६. आगारगामिणा	-----	------	-----
७. कारकाणि	-----	------	-----
८. गिरिगुहाणाम्	-----	------	-----
९. वरयुवकाणाम्	-----	------	-----
१०. राजगृहाणि	-----	------	-----
११. वारिवाहाणाम्	-----	------	-----
१२. श्रवणेन	-----	------	-----
१३. प्रावारकाणाम्	-----	------	-----
१४. चक्रवाकेण	-----	------	-----
१५. अक्ष्णा	-----	------	-----
१६. उपकरणानि	-----	------	-----
१७. प्रभूणाम्	-----	------	-----

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यासः - ९ अधोनिर्दिष्टेषु प्रत्युदाहरणेषु यथासम्भवं प्रतिबन्धककारणानि निर्दिशत ।

पदम्	निमित्ताभावः	प्रतिबन्धक-वर्णाः	नकारः विभक्त्यादि-सम्बन्धरहितः
उदा - रामनाम	-----	-----	✓
१. माण्डलिकानाम्	------	------	------
२. रश्मिना	------	------	------
३. गिरिनन्दिनी	------	------	------
४. उट्टङ्कनम्	------	------	------
५. मातृवन्दनम्	------	------	------
६. सुन्दरनयनम्	------	------	------
७. समदर्शिना	------	------	------
८. कर्मठेन	------	------	------
९. चक्रनेमिः	------	------	------
१०. अण्डानाम्	------	------	------
११. दीर्घनौका	------	------	------
१२. सुरनर्तकी	------	------	------
१३. अष्टवादनम्	------	------	------

अभ्यासः - १० शुद्धरूपं '✓' चिह्नेन, अशुद्धरूपं 'x' चिह्नेन च अङ्कयित्वा शुद्धत्वस्य अशुद्धत्वस्य वा कारणम् अपि संक्षेपेण निर्दिशत ।

यथा - एतादृशेण (x) (शकारव्यवधानम् अस्ति ।)

In Public domain. Digitization Muthulakshmi Research Academy

१. शशाङ्केण (-----) (----------)
२. दृश्यमाणम् (-----) (----------)
३. क्रियमाणे (-----) (----------)
४. द्रव्यानाम् (-----) (----------)
५. कार्यदर्शिणा (-----) (----------)
६. परिश्रमेण (-----) (----------)
७. शिवरामेन (-----) (----------)
८. चिन्त्यमाणे (-----) (----------)
९. पितृव्यानाम् (-----) (----------)
१०. महाराजेण (-----) (----------)
११. दर्शनयोग्येण (-----) (----------)
१२. विमर्शकाणाम् (-----) (----------)
१३. वार्तालापेण (-----) (----------)
१४. विश्वासार्हानाम् (-----) (----------)
१५. अनुधाव्यमाणः (-----) (----------)
१६. सन्तोषेन (-----) (----------)
१७. गूढचरानाम् (-----) (----------)
१८. बाणप्रयोगेन (-----) (----------)
१९. धर्मदर्शिणा (-----) (----------)
२०. रामचन्द्रेन (-----) (----------)

१.५ णत्वनिषेधः

पदान्ते स्थितस्य नकारस्य णकारः न भवति ।
यथा - i) रामान् ii) हरीन् iii) त्रीन् - इत्यादीनि ।

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम् - १

णत्वम्

अखण्डपदे	समस्तपदे	उपसर्गनिमित्तम्
१. पुष्णाति	३. (विकल्पेन)	५. परिणमति
तिसृणाम्	व्रीहिवापिणौ / नौ	परिणामः
२. करणम्, अर्केण	व्रीहिवापाणि / नि	६. प्रयाणम्
गर्भेण,	व्रीहिवापेण / न	
पर्याणद्धम्, बृंहणम्	४. दौर्भाग्येण	

णत्वविधायकसूत्राणि -

१. **रषाभ्यां नो णः समानपदे - ८.४.१**
एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात् ।

२. **अट्कुप्वाङ्नुम्व्यवायेऽपि - ८.४.२**
अट्, कवर्गः, पवर्गः, आङ्, नुम् - इत्येतैः यथासम्भवं मिलितैः व्यवधानेऽपि नस्य णः स्यात् समानपदे ।

३. **प्रातिपदिकान्तनुम्विभक्तिषु च - ८.४.११**
पूर्वपदस्थात् निमित्तात् परस्य एषु स्थितस्य नस्य णो वा स्यात् ।

४. **कुमति च - ८.४.१३.**
कवर्गवति उत्तरपदे (प्रातिपदिकान्तनुम्विभक्तिषु) नित्यं णत्वं स्यात् ।

५. **उपसर्गादसमासेऽपि णोपदेशस्य - ८.४.१४**
उपसर्गस्थात् निमित्तात् परस्य णोपदेशस्य धातोः नस्य णः स्यात् समासे असमासे अपि ।

६. **कृत्यचः - ८.४.२९**
उपसर्गस्थात् निमित्तात् परस्य अचः उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् ।

(णोपदेशाः प्रसिद्धाः - नटति, नदति, नमति, नश्यति, नह्यति, निन्दति, नौति, नयति, नुदति, नुवति इत्यादयः ।)

In Public domain. Digitization Muthulakshmi Research Academy

परिशिष्टम् - २



णत्वनिषेधसूत्राणि -

१. **पदान्तस्य - ८.४.३७**
पदान्तस्य नस्य णत्वं न स्यात् ।

२. **न भाभूपूकमिगमिप्यायीवेपाम् - ८.४.३४**
एभ्यः कृत्स्थस्य नस्य णो न स्यात् ।

३. **नशेः षान्तस्य - ८.४.३९**
एषु णत्वं न स्यात् ।

४. **वा निंसनिक्षनिन्दाम् - ८.४.३३**
एषां नस्य णो वा स्यात् कृति परे

णत्वसम्बन्धीनि सूत्राणि - ३९ (णत्वनिषेधसूत्राणि ६ अविहाय)
तेषु अतिप्रसिद्धानि - १० (णत्वनिषेधसूत्राणि - ४ अविहाय)

णत्वनिषेधसूत्राणि - ६
तेषु अतिप्रसिद्धानि - ४

In Public domain. Digitization Muthulakshmi Research Academy

२. णिजन्ताः (प्रेरणार्थकाः)

२.० उपक्रमः

i) अध्यापकः पत्रं लिखति ।

ii) अध्यापकः छात्रेण पत्रं लेखयति ।

उपरि निर्दिष्टे प्रथमे वाक्ये अध्यापकः स्वयं पत्रं लिखति । किन्तु द्वितीये वाक्ये छात्रः पत्रं लिखति, अध्यापकः तु छात्रं लेखनार्थं प्रेरयति । प्रथमवाक्ये क्रियापदं 'लिखति' इति । द्वितीयवाक्ये क्रियापदं 'लेखयति' इति । 'लेखयति' इति यत् रूपम् अस्ति तत् 'णिजन्तम्' इति, 'प्रेरणार्थकम्' इति वा उच्यते । पठति, लिखति, पतति .... इत्यादीनि क्रियापदानि वयं जानीमः एव । तेषां सर्वेषाम् अपि धातूनां णिजन्तरूपाणि कर्तुं शक्यते ।

यथा - पठति - पाठयति
लिखति - लेखयति
पतति - पातयति इत्यादीनि ।

२.१ णिजन्ते पदव्यवस्था

प्रायः णिजन्ताः उभयपदिनः । केचन एव धातवः केवलपरस्मैपदिनः* । उभयपदिनाम् अपि परस्मैपदिरूपम् अस्ति एव इत्यतः णिजन्ताः सर्वत्र परस्मैपदित्वेन प्रयुक्ताः चेत् कुत्रापि दोषस्य अवकाशः न भवति । स्वार्थे आत्मेपदिनः अपि धातवः प्रेरणार्थे (णिजन्ते) परस्मैपदिरूपम् अर्हन्ति । अतः स्वार्थे यः आत्मनेपदी भवति सः धातुः प्रेरणार्थे अपि आत्मनेपदित्वेन एव प्रयोक्तव्यः इति भ्रान्तिः मास्तु । स्वार्थे तु वयम् आत्मनेपदित्वं परस्मैपदित्वं वा निर्णयामः, अभ्यासबलात् । प्रेरणार्थे तु सर्वत्र परस्मैपदिरूपप्रयोगः सौलभ्याय दोषराहित्याय च ।

---

* 'बुधयुधजनेङ्प्रुद्रुसृभ्यो णेः' (२.३.३६), 'निगरणचलनार्थेभ्यश्च' (१.३.८७) इति सूत्रद्वयं पश्यत ।

In Public domain. Digitization Muthulakshmi Research Academy

यथा -

स्वार्थे	प्रेरणार्थे
वर्धते	वर्धयति
वन्दते	वन्दयति
प्रकाशते	प्रकाशयति
उड्डयते	उड्डाययति इत्यादयः ।

अभ्यासः - ११ उदाहरणम् अनुसरन्तः अधः सूचितानां क्रियापदानां णिजन्तरूपाणि (प्रेरणार्थकरूपाणि) लिखत ।

i) उदा - हसति - (हासयति)

१. दहति (--------) २. चलति (--------)
३. अटति (--------) ४. नश्यति (--------)
५. खनति (--------) ६. भ्रमति (--------)
७. स्मरति (--------) ८. वदति (--------)
९. नयति (--------) १०. भवति (--------)
११. त्यजति (--------) १२. शेते (--------)
१३. खादति (--------) १४. धावति (--------)
१५. विकसति (--------) १६. संहरति (--------)
१७. करोति (--------) १८. जागर्ति (--------)
१९. बिभेति (--------) २०. विस्तृणोति (--------)
२१. धरति (--------) २२. गृह्णाति (--------)

ii) उदा - कर्षति - (कर्षयति)

१. वर्धते (--------) २. वर्षति (--------)
३. स्पृशति (--------) ४. सृजति (--------)

In Public domain. Digitization Muthulakshmi Research Academy

५. प्रवर्तते (--------) ६. नृत्यति (--------)
७. कम्पते (--------) ८. गच्छति ([गम्]-------)
९. गर्जति (--------) १०. पश्यति ([दृश्]------)

iii) उदा - लिखति - (लेखयति)

१. क्षिपति (--------) २. उपदिशति (--------)
३. प्रविशति (--------) ४. मिलति (--------)
५. सिञ्चति (--------) ६. खिद्यते (--------)

iv) उदा - कुप्यति - (कोपयति)

१. तुष्यति (--------) २. शुष्यति (--------)
३. आरोहति (--------) ४. बुध्यते (--------)
५. भुङ्क्ते (--------) ६. नुदति (--------)

v) उदा - गायति - (गापयति)

१. तिष्ठति ([स्था]-------) २. अधीते (--------)
३. ददाति (--------) ४. याति (--------)
५. स्नाति (--------) ६. जानाति (--------)

vi) उदा - स्थापयति - (स्थापयति)

स्वार्थे यत्र णिच् कृतः अस्ति तत्र प्रेरणार्थे अपि तदेव रूपम् ।
एतादृशस्थले स्वार्थ-प्रेरणार्थयोः रूपभेदः नास्ति ।

१. चोरयति (------) २. क्षालयति (------)
३. ताडयति (------) ४. पीडयति (------)

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यासः - १२

अधः कानिचन अणिजन्तक्रियापदानि निर्दिष्टानि सन्ति । तेषां णिजन्तरूपं लिखित्वा, अधः णिजन्तरूपस्य उपयोगेन कर्मसहितं पूर्णं वाक्यम् अपि लिखत ।

उदा - आनयति - आनाययति
कृष्णशास्त्री पुनःपूरणीम् आनाययति ।

१. खादति (--------)	माता (--------)
२. करोति (--------)	स्वामी (--------)
३. लिखति (--------)	सुरेशः (--------)
४. ददाति (--------)	पिता (--------)
५. कम्पते (--------)	कपिः (--------)
६. प्रवर्तते (--------)	यन्त्रज्ञः (--------)
७. स्मरति (--------)	सः (--------)
८. चलति (--------)	बालकः (--------)
९. वदति (--------)	भगिनी (--------)
१०. जागर्ति (--------)	माता (--------)
११. उत्तिष्ठति (--------)	अध्यापकः (--------)
१२. हसति (--------)	विदूषकः (--------)
१३. धरति (--------)	अग्रजा (--------)
१४. मिलति (--------)	क्षीरविक्रेता क्षीरे (--------)
१५. बुध्यते (--------)	गुरुः (--------)

In Public domain. Digitization Muthulakshmi Research Academy

२.२ प्रयोज्यकर्ता प्रयोजककर्ता च

अध्यापकः — प्रयोजककर्ता
छात्रेण — प्रयोज्यकर्ता
पत्रं लेखयति ।

णिजन्तयुक्ते वाक्ये कर्तृपदद्वयं दृश्यते । यः प्रेरकः भवति सः प्रयोजककर्ता । यः प्रेरितः भवति (यः लेखनपठनादिक्रियां करोति - यः स्वार्थक्रियायाः कर्ता) सः प्रयोज्यकर्ता इति उच्यते ।

अभ्यासः - १३ अधोनिर्दिष्टेषु वाक्येषु कः प्रयोजककर्ता, कः प्रयोज्यकर्ता इति निर्दिशत ।

वाक्यम्	प्रयोजककर्ता	प्रयोज्यकर्ता
उदा - पिता पुत्रं मन्दिरं गमयति ।	पिता	पुत्रः
१. माता पुत्रीम् औषधं पाययति ।	------	-----
२. माता पुत्रेण गुरुं वन्दयति ।	------	-----
३. स्वामी पाचकेन अन्नं पाचयति ।	------	-----
४. सखी बालिकया द्वारं नोदयति ।	------	-----
५. स्वामी कर्मकरेण वस्तूनि आनाययति ।	------	-----
६. सः मां गीतं श्रावयति ।	------	-----
७. सा सेवकेन कार्यं कारयति ।	------	-----
८. अध्यापकः छात्रं पाठं पाठयति ।	------	-----

२.३ प्रयोज्यकर्तुः द्वितीया कुत्र ?

अधस्तनं वाक्यद्वयं पश्यत -

i) गुरुः छात्रं पाठं पाठयति ।

ii) स्वामी पाचकेन अन्नं पाचयति ।

In Public domain. Digitization Muthulakshmi Research Academy

उपरिनिर्दिष्टं वाक्यद्वयम् अपि णिजन्तयुक्तम् । प्रथमे वाक्ये प्रयोज्यकर्ता छात्रः । द्वितीये वाक्ये प्रयोज्यकर्ता पाचकः ।

किन्तु प्रथमे वाक्ये प्रयोज्यकर्तुः छात्रस्य द्वितीयाविभक्तिः दृश्यते । द्वितीये वाक्ये प्रयोज्यकर्तुः पाचकस्य तृतीयाविभक्तिः दृश्यते । एतेन ज्ञातं यत् णिजन्तवाक्येषु सर्वत्र द्वितीया इति, सर्वत्र तृतीया इति वा निर्णेतुं न शक्यते इति । क्रियापदानाम् अर्थं दृष्ट्वा द्वितीया तृतीया वा करणीया भवति ।

*** गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (१.४.५२)**
*** दृशेश्च (वार्तिकम्)**
*** नीवह्योर्न । * आदिखाद्योर्न । * भक्षयतेरहिंसार्थस्य न ।**

गति-बुद्धि-प्रत्यवसानार्थकानां शब्दकर्मकाणाम् अकर्मकाणां च धातूनां णिजन्ते प्रयोज्यकर्तुः द्वितीया भवति । दृशधातोः प्रयोगे अपि णिजन्ते प्रयोज्यकर्तुः द्वितीया एव । [गत्यर्थकेषु नीवहधात्वोः, प्रत्यवसानार्थकेषु अद्भक्षधात्वोः, भक्षयतेः (अहिंसार्थकस्य) चापि द्वितीया न भवति ।]

अधोनिर्दिष्टानां धातूनां णिजन्ते प्रयोज्यकर्तुः द्वितीया भवति -

i) **गत्यर्थकानां धातूनाम् -** (नयति, वहति - इति धातुद्वयं विहाय)
यथा - गच्छति, अटति, सञ्चरति इत्यादयः ।

ii) **बुध्यर्थकानां (ज्ञानार्थकानां) धातूनाम् -**
यथा - जानाति, बोधति - इत्यादयः ।

iii) **प्रत्यवसानार्थकानां (भक्षणार्थकानां) धातूनाम् -** (अत्ति, खादति, भक्षयति इत्येतान् धातून् विहाय)
यथा - पिबति, भुङ्क्ते, अश्नाति इत्यादयः ।

iv) **शब्द एव येषां कर्म तादृशानां धातूनाम् -**
यथा - पठति, शृणोति, अधीते इत्यादयः ।

---

* *हृक्रोरन्यतरस्याम् (१.४.५३)* इति सूत्रेण हरतेः करोतेः च योगे कर्मसंज्ञा (द्वितीया) विकल्पेन ।

In Public domain. Digitization Muthulakshmi Research Academy

v) **अकर्मकाणाम् -**

यथा - जागर्ति, तिष्ठति, उपविशति, हसति, रोदिति इत्यादयः ।

vi) **दृशधातोः -**

२.३.१ अकर्मकधातूनां णिजन्ते प्रयोज्यकर्तुः द्वितीया -

अणिजन्ताः अकर्मकाः धातवः यत्र प्रयुक्ताः तादृशेषु वाक्येषु कर्मपदं न भवति खलु ? यदा ते च धातवः णिजन्ताः भवन्ति तदा तेन युक्तानि वाक्यानि सकर्मकाणि भवन्ति । तन्नाम प्रयोज्यकर्तुः द्वितीया भवति ।

अभ्यासः - १४ अधः कर्त्रा/कर्त्र्या यत् न कृतं तत् निर्दिष्टम् अस्ति । तेन कर्त्रा/तया कर्त्र्या यद्यपि तत् न कृतं, किन्तु तत् कारितम् । अतः अधः सूचितानां वाक्यानाम् आधारेण कः/का किं कारितवान्/कारितवती इति लिखत ।

उदा - रविः न पतितवान् । रविः अरविन्दं पातितवान् ।

१. वीणा न हसितवती । --- --- --- --- । (सीमा)
२. विद्या न रुदितवती । --- --- --- --- । (कमला)
३. रामः न उत्थितवान् । --- --- --- --- । (श्यामः)
४. दिनेशः न उपविष्टवान् । --- --- --- --- । (पिता)
५. गोपालः न कुपितवान् । --- --- --- --- । (पत्नी)
६. सः न भीतवान् । --- --- --- --- । (बालकाः)
७. बालिका न पतितवती । --- --- --- --- । (सखी)
८. बालकः न रुदितवान् । --- --- --- --- । (मित्रम्)
९. एषः न अनुसृतवान् । --- --- --- --- । (सेवकः)
१०. अधिकारी न अटितवान् । --- --- --- --- । (कर्मकरः)
११. विदूषकः न मुदितवान् । --- --- --- --- । (जनाः)

In Public domain. Digitization Muthulakshmi Research Academy

१२. धनिकः न चालितवान् । --- --- --- --- (वाहनम्)

१३. गीता न प्रवृत्तवती । --- --- --- --- (अन्यः)

१४. दिव्या न नष्टवती । --- --- --- --- (पुस्तकम्)

१५. माता न शयितवती । --- --- --- --- (शिशुः)

२.३.२ **गत्यर्थकधातूनां णिजन्ते प्रयोज्यकर्तुः द्वितीया । (नयति, वहति इति धातुद्वयं विहाय)**

'रामः विद्यालयं गच्छति' इत्येतत् अणिजन्तक्रियापदयुक्तं वाक्यम् । यदा पिता गमयति तदा (णिजन्तवाक्ये) पिता प्रयोजककर्ता भवति । प्रयोज्यकर्तुः रामस्य द्वितीयाविभक्तिः भवति ।

यथा - रामः विद्यालयं गच्छति - पिता रामं विद्यालयं गमयति।

अभ्यासः - १५ अधः अणिजन्तक्रियापदयुक्तानि वाक्यानि निर्दिष्टानि । वाक्यानां पुरतः प्रयोजककर्ता आवरणे निर्दिष्टः । एतदाधारेण प्रयोज्यकर्तृपदं द्वितीयाविभक्तौ लिखन्तः णिजन्तवाक्यानि लिखत ।

उदा - पुत्री मन्दिरं गच्छति । (माता)
माता पुत्रीं मन्दिरं गमयति ।

१. पुत्रः नगरं गच्छति । (पिता)
---- ---- ---- ---- ---- ---- ---- ।

२. कार्यकर्ता आपणं गच्छति । (अध्यक्षः)
---- ---- ---- --------- ---- ---- ।

३. पान्थः ग्रामं प्राप्नोति । (ग्रामीणः)
---- ---- ---- ---- ---- ---- ---- ।

४. भगिनी गृहं प्राप्नोति । (अग्रजः)
---- ---- ---- ---- ---- ---- ---- ।

In Public domain. Digitization Muthulakshmi Research Academy

५. दिनेशः पत्रालयं गच्छति । (रमेशः)

---- ---- ---- ---- ---- ---- ---- ।

६. बस्यानं ग्रामं गच्छति । (चालकः)

---- ---- ---- ---- ---- ---- ---- ।

२.३.३

i) बुद्ध्यर्थकानां धातूनां
ii) प्रत्यवसानार्थकानां धातूनां
(अत्ति, खादति, भक्षयति इत्येतान् धातून् विहाय)
iii) (शब्दकर्मकाणां धातूनां)
iv) दृशधातोः च

] णिजन्ते प्रयोगकर्तुः द्वितीया

अभ्यासः - १६ आवरणे निर्दिष्टस्य प्रयोजककर्तुः अणिजन्तवाक्यस्य च साहाय्येन उदाहरणेषु इव प्रयोज्यकर्तुः द्वितीयां कुर्वन्तः णिजन्तवाक्यानि लिखत ।

उदा - छात्रः वार्तां जानाति । (अध्यापकः)
अध्यापकः छात्रं वार्तां ज्ञापयति ।

१. शिवः विषयं जानाति । (शङ्करः)

---- ---- ---- ---- ---- ---- ---- ।

२. सञ्चालकः मार्गं जानाति । (निर्देशकः)

---- ---- ---- ---- ---- ---- ---- ।

३. बालाः व्याकरणम् अधीयते । (अध्यापकः)

---- ---- ---- ---- ---- ---- ---- ।

४. छात्रः श्लोकार्थं बोधति । (गुरुः)

---- ---- ---- ---- ---- ---- ---- ।

५. पान्थः मार्गं जानाति । (आरक्षकः)

---- ---- ---- ---- ---- ---- ---- ।

In Public domain. Digitization Muthulakshmi Research Academy

अभ्यासः - १७ पूर्वोदाहरणे इव अत्रापि कुरुत ।

उदा - शिशुः अन्नं भुङ्क्ते । (माता)
माता [शिशुम्] अन्नं [भोजयति ।]

१. रुग्णः अन्नं भुङ्क्ते । (माता)
---- ---- ---- ---- ---- ---- ---- ।

२. गोपालः क्षीरं पिबति । (भगिनी)
---- ---- ---- ---- ---- ---- ---- ।

३. रुग्णा माता औषधं पिबति । (पुत्री)
---- ---- ---- ---- ---- ---- ---- ।

४. वृद्धा यवागूं भुङ्क्ते । (पुत्री)
---- ---- ---- ---- ---- ---- ---- ।

५. भग्नहस्तः अनुजः क्षीरं पिबति । (अग्रजा)
---- ---- ---- ---- ---- ---- ---- ।

अभ्यासः - १८ पूर्वोदाहरणे इव अत्रापि कुरुत ।

उदा - पत्नी गीतं शृणोति । (पतिः)
पतिः [पत्नीं] गीतं [श्रावयति ।]

१. प्रवाचकः वार्तां शृणोति । (प्रतिनिधिः)
---- ---- ---- ---- ---- ---- ---- ।

२. छात्रः वेदं पठति । (आचार्यः)
---- ---- ---- ---- ---- ---- ---- ।

३. विद्यार्थिनी गीतं पठति । (अध्यापिका)
---- ---- ---- ---- ---- ---- ---- ।

In Public domain. Digitization Muthulakshmi Research Academy

४. त्रिविक्रमः कथां शृणोति । (वेतालः)

---- ---- ---- ---- ---- ---- ---- ।

५. ज्येष्ठः इतिवृत्तं शृणोति । (कार्यकर्ता)

---- ---- ---- ---- ---- ---- ---- ।

अभ्यासः - १९ पूर्वोदाहरणे इव अत्रापि कुरुत ।

उदा - निर्वाहकः नदीं पश्यति । (चालकः)
चालकः [निर्वाहकं] नदीं [दर्शयति] ।

१. जनकः युतकं पश्यति । (पुत्रः)

---- ---- ---- ---- ---- ---- ---- ।

२. भगिनी चित्रं पश्यति । (सखी)

---- ---- ---- ---- ---- ---- ---- ।

३. यात्रिकः देवालयं पश्यति । (अर्चकः)

---- ---- ---- ---- ---- ---- ---- ।

४. प्रतिवेशिनी शाटिकां पश्यति । (गृहिणी)

---- ---- ---- ---- ---- ---- ---- ।

५. यशोदा विश्वं पश्यति । (कृष्णः)

---- ---- ---- ---- ---- ---- ---- ।

अभ्यासः - २०

प्रभुदेवः कश्चन धनिकः । तस्य गृहं नारायणः गतवान् । यदा नारायणः तत्र गतः तदा प्रभुदेवः गृहे स्थितेषु एकैकम् उद्दिश्य एकैकं कार्यम् उक्तवान् । कम् उद्दिश्य किम् उक्तम् इति अधः निर्दिष्टम् अस्ति ।

In Public domain. Digitization Muthulakshmi Research Academy

एते सूचिताः		एवम् उक्तम्
१. कनिष्ठपुत्रः	-	प्रातः शीघ्रम् उत्तिष्ठतु ।
२. ज्येष्ठपुत्रः	-	सायं नगरं प्राप्नोतु ।
३. मध्यमपुत्रः	-	वेदं पठतु ।
४. पुत्री	-	शाटिकां पश्यतु ।
५. अतिथिः	-	आसने उपविशतु ।
६. पत्नी	-	विषयं जानातु ।
७. सहोदरः	-	गृहे तिष्ठतु ।
८. कर्मकरः	-	रात्रौ क्षेत्रे अटतु ।
९. अम्बा	-	मञ्चे शेरताम् (शयनं करोतु ।)
१०. जनकः	-	औषधं पिबतु ।
११. कर्मकरी	-	क्षेत्रं गच्छतु ।
१२. मातुलानी	-	गीतं शृणोतु ।

उपरि सूचितस्य कोष्ठकस्य आधारेण प्रभुदेवः केन किं कारयति इति लिखत ।

उदा - १. प्रभुदेवः कनिष्ठपुत्रं प्रातः शीघ्रम् उत्थापयति ।

२. प्रभुदेवः ---- ---- ---- ---- ---- ---- ।
३. ,, ---- ---- ---- ---- ---- ---- ।
४. ,, ---- ---- ---- ---- ---- ---- ।
५. ,, ---- ---- ---- ---- ---- ---- ।
६. ,, ---- ---- ---- ---- ---- ---- ।
७. ,, ---- ---- ---- ---- ---- ---- ।
८. ,, ---- ---- ---- ---- ---- ---- ।
९. ,, ---- ---- ---- ---- ---- ---- ।
१०. ,, ---- ---- ---- ---- ---- ---- ।
११. ,, ---- ---- ---- ---- ---- ---- ।
१२. ,, ---- ---- ---- ---- ---- ---- ।

In Public domain. Digitization Muthulakshmi Research Academy

२.४ गत्याद्यर्थकभिन्नस्थलेषु तृतीया

णिजन्ते प्रयोज्यकर्तुः द्वितीया षट्सु स्थलेषु भवति इति, गत्यर्थके वहति-नयत्योः प्रयोगे, प्रत्यवसानार्थके अत्ति-खादति-भक्षयतीनां प्रयोगे च द्वितीया न भवति (अपि तु तृतीया) इति च वयं ज्ञातवन्तः । एतद्भिन्नस्थलेषु सर्वत्र तृतीया इति अवगन्तव्यम् । अतः उदाहरणं यदा पश्यामः तदा तत्र प्रयुक्तः धातुः गत्याद्यर्थको वा इति प्रथमं द्रष्टव्यम् । गत्याद्यर्थकः चेत् प्रयोज्यकर्तुः द्वितीया करणीया, अन्यथा तृतीया ।

अभ्यासः - २१

जयदेवस्य गृहे कश्चन विशेषकार्यक्रमः । बहवः विविधकार्येषु मग्नाः दृश्यन्ते । जयदेवस्य मित्रम् एकत्र उपविश्य कः किं कृतवान्, कः कारितवान् (करोतु इति उक्तवान्) इति पश्यति । तेन दृष्टस्य विवरणम् अधः अस्ति ।

कर्ता	*कार्यम्*	*कारयिता*
१. सेवकः	भारं वहति	गृहस्वामी
२. पौत्री	पुष्पाणि अवचिनोति	गृहिणी
३. कर्मकरः	उद्यानं सिञ्चति	पितृव्या
४. बालकः	गुरुं नमति	ज्येष्ठपुत्री
५. कर्मकरी	फेनकं क्रीणाति	पुत्रः
६. पाचकः	रोटिकां पचति	वृद्धा
७. अनुजः	आसन्दं नुदति	अग्रजः
८. अनुजा	पाषाणं क्षिपति	अग्रजा
९. पाचिका	क्षीरम् आनयति	ज्येष्ठपुत्रः
१०. शिशुः	अन्नं खादति	स्नुषा
११. तरुणः	पत्रं लिखति	कर्मकरी

उपरि कोष्ठके यत् निर्दिष्टं तदाधारेण कः केन किं कारयति इति निर्दिशत ।

In Public domain. Digitization Muthulakshmi Research Academy

(कोष्ठके निर्दिष्टः कर्ता णिजन्ते प्रयोज्यकर्ता, कारयिता प्रयोजककर्ता । एतेषु प्रयोज्यकर्तुः तृतीया भवति इति स्मरत ।)

उदा - १. गृहस्वामी सेवकेन भारं वाहयति ।

२. ---- ---- ---- ---- ---- ---- ।

३. ---- ---- ---- ---- ---- ---- ।

४. ---- ---- ---- ---- ---- ---- ।

५. ---- ---- ---- ---- ---- ---- ।

६. ---- ---- ---- ---- ---- ---- ।

७. ---- ---- ---- ---- ---- ---- ।

८. ---- ---- ---- ---- ---- ---- ।

९. ---- ---- ---- ---- ---- ---- ।

१०. ---- ---- ---- ---- ---- ---- ।

११. ---- ---- ---- ---- ---- ---- ।

अभ्यासः - २२

प्रसादः कश्चन अध्यापकः । वार्षिकोत्सवस्य समग्रा व्यवस्था तेन करणीया अस्ति । विद्यार्थिनां साहाय्येन कार्यं कारणीयम् इति निश्चित्य सः छात्राणां नाम स्मरन् कः किं करोतु इति चिन्तितवान् । यत् चिन्तितं तस्य स्मरणार्थं तेन सज्जीकृतस्य पत्रस्य विवरणम् अधः अस्ति ।

१. कृष्णः - अलङ्कारं करोतु ।	५. देवनाथः - मुख्याध्यापकं पश्यतु ।
२. माधवः - आपणं गच्छतु ।	६. अशोकः - उपाहारं ददातु ।
३. गोविन्दः - अतिथिम् आनयतु	७. बालकाः - आसन्दान् वहन्तु ।
४. सीता - गीतं गायतु ।	८. अध्यक्षः - वेदिकायाम् उपविशतु ।

In Public domain. Digitization Muthulakshmi Research Academy

९. हरिः - इतिवृत्तं लिखतु ।	१३. ललिता - धनं पृच्छतु ।
१०. केशवः- कार्यक्रमविवरणं जानातु ।	१४. बालिकाः - लताः सिञ्चन्तु ।
११. श्रीशः - हारं क्रीणातु ।	१५. राधा - अवकरान् क्षिपतु ।
१२. गीता - श्लोकं वदतु ।	१६. पालकाः - कार्यक्रमं पश्यन्तु ।

अध्यापकः प्रसादः किं किं कारयति इति लिखत । प्रयोज्यकर्तुः द्वितीया वा तृतीया वा इति लेखनात् पूर्वं चिन्तयत ।

उदा - १. प्रसादः कृष्णेन अलङ्कारं कारयति ।
२. प्रसादः माधवम् आपणं गमयति ।

३. प्रसादः ------- ------- ------ ------ ।
४. '' ------- ------- ------- ------- ।
५. '' ------- ------- ------- ------- ।
६. '' ------- ------- ------- ------- ।
७. '' ------- ------- ------- ------- ।
८. '' ------- ------- ------- ------- ।
९. '' ------- ------- ------- ------- ।
१०. '' ------- ------- ------- ------- ।
११. '' ------- ------- ------- ------- ।
१२. '' ------- ------- ------- ------- ।
१३. '' ------- ------- ------- ------- ।
१४. '' ------- ------- ------- ------- ।
१५. '' ------- ------- ------- ------- ।
१६. '' ------- ------- ------- ------- ।

In Public domain. Digitization Muthulakshmi Research Academy

उत्तराणि

णत्वम्

अभ्यासः - १

अखण्डपदानि - १, २, ४, ६, १०, १२, १४, १५, १७, १८, २०, २२, २३, २४ ।

अभ्यासः - २

१. सम् + कीर्णः । २. शूर्प + नखा । ३. धारा + नगरी । ४. त्रि + नयनः । ५. सम् + कीर्तनम् । ६. परा + अयनः । ७. नमस् + कारेण । ८. निर् + नाम । ९. राम + अयनम् । १०. प्र + नि + धानम् । ११. बृहत् + नला । १२. मृग + नयना । १३. परि + पोषणम् । १४. विष + अन्नम् । १५. मृषा + वचनम् । १६. विषण्ण + वदनः ।

अभ्यासः - ३

१. ष् २. ऋ ३. र् ४. ष् ५. र् ६. ऋ ७. ऋ ८. ष् ९. र् ।

अभ्यासः - ४

१. ष्+अ । २. ष्+अ । ३. र् । ४. र्+अ । ५. ष्+अ+क्+ए । ६. ष्+ए । ७. र्+ए । ८. र्+आ+म् +ए । ९. र्+अ+म्+अ ।१०. ऋ । ११. ऋ । १२. ष्+ऊ । १३. ऋ । १४. ष्+ए । १५. ष्+ई+य्+ए । १६. र्+य्+ए । १७. ष्+उ+क्+आ । १८. ष्+अ ।१९. र्+अ+म्+ अ । २०. र्+अ+व्+अ ।

अभ्यासः - ५

१. प्रातिपदिकान्तः । २. विभक्तिसम्बद्धः । ३. विभक्तिसम्बद्धः । ४. " । ५. " । ६. " । ७. नुम्सम्बन्धी । ८. विभक्तिसम्बद्धः ।

अभ्यासः - ६

१. र्+इ+य्+आ+न ।
२. र्+अ+ह्+म्+अ+न ।
३. र्+म्+आ+न ।
४. ष्+अ+न ।
५. ष्+अ+भ्+ओ+ग्+य्+ए+न ।
६. र्+घ्+य्+ए+न ।
७. ऋ+म्+ई+न ।
८. ष्+अ+व्+आ+प्+आ+न ।
९. र्+अ+म्+अ+न ।
१०. ऋ+ +ह्+अ+न ।
११. र्+अ+भ्+आ+ग्+य्+ए+न ।
१२. र्+ई+य्+अ+म्+आ+न ।
१३. र्+इ+भ्+अ+व्+ए+न ।
१४. र्+अ+व्+य्+अ+व्+य्+अ+य्+ए+न ।
१५. र्+अ+ऊ+प्+य्+अ+क्+आ+न ।
१६. र्+अ+म्+अ+न ।
१७. ष्+अ+न
१८. र्+अ+व्+इ+म्+अ+य्+ऊ+ख्+ ए+न ।
१९. र्+अ+म्+अ+न ।
२०. र्+इ+ना ।

अभ्यासः - ७

१. (ज) २. (च) ३. (श) ४. (ल) ५. (च) ६. (त) ७. (ढ) ८. (स) ९. (ट) १०. (ञ) ११. (द) १२. (द) १३.

In Public domain. Digitization 2018 Muthulakshmi Research Academy

(स्थ) १४. (ज्) १५. (त)१६. (त)
१७. (ध) १८. (ज्) १९. (ध) २०. (च)

अभ्यासः - ८

१. र्, आ, अख्ण्डम् । २. र्, ए, अखण्डम् । ३. ऋ, क्+ए, अखण्डम् । ४. र्, आ, अखण्डम् । ५. र्, अ, अखण्डम् । ६. र्, अ+ग्+आ+म्+इ, सखण्डम् । ७. र्, अ+क+आ, अखण्डम् ८. र्, इ+ग्+उ+ह+आ, सखण्डम् ९. र्, अ+य्+उ+व्+अ+क्+आ, सखण्डम् १०. ऋ, ह्+आ, अखण्डम् ११. र्, इ+व्+आ+ह्+आ, सखण्डम् १२. र्, अ+व्+अ, अखण्डम् १३. र्, अ+क्+आ, अखण्डम् १४. र्, अ+व्+आ+क्+ए, सखण्डम् १५. ष, नास्ति, अखण्डम् १६. र्, अ, अखण्डम् १७. र्, अ+भ्+ऊ, सखण्डम्

अभ्यासः - ९

१. निमित्ताभावः । २. प्रतिवन्धकवर्ण-सद्भावः । ३. नकारः विभक्त्यदिसम्वन्ध-रहितः । ४. निमित्ताभावः ५. नकारः विभक्त्यादिसम्बन्धरहितः । ६. नकारः विभक्त्यादिसम्वन्धरहितः । ७. प्रतिवन्धक-वर्णसद्भावः ८. प्रतिबन्धकवर्णसद्भावः । ९. नकारः विभक्त्यादिसम्बन्धरहितः । १०. निमित्ताभावः ११. नकारः विभक्त्यादिसम्बन्धरहितः । १२. नकारः विभक्त्यादिसम्वन्धरहितः । १३. प्रतिबन्धकवर्णसद्भावः ।

अभ्यासः - १०

१. (x) निमित्तं नास्ति । २. (x) शकार-व्यवधानम् अस्ति । ३. (✓) व्यवधानं नास्ति, समानपदं च । ४. (x) निमित्तम् अस्ति, व्यवधानं नास्ति । ५. (x) शकार-व्यवधानम् अस्ति । ६. (✓) निमित्तम् अस्ति, व्यवधानं नास्ति । ७. (x) निमित्तम् अस्ति, व्यवधानं नास्ति । ८. (x) निमित्तं नास्ति । ९. (x) निमित्तम् अस्ति, व्यवधानं नास्ति । १०. (x) जकारव्यवधानम् । ११. (x) शकारादिव्यवधानम् । १२. (x) शकारादिव्यवधानम् । १३. (x) तकारादिव्यवधानम् । १४. (x) निमित्तम् अस्ति, व्यवधानं नास्ति । १५. (x) निमित्ताभावः । १६. (x) पकारनिमित्तमस्ति, व्यवधानं नास्ति । १७. (x) व्यवधानं नास्ति । १८. (x) व्यवधानं नास्ति । १९. (x) शकारव्यवधानम् । २०. (x) व्यवधानं नास्ति ।

णिजन्तम्

अभ्यासः - ११

i) १. दाहयति । २. चालयति । ३. आटयति । ४. नाशयति । ५. खानयति । ६. भ्रमयति । ७. स्मारयति । ८. वादयति । ९. नाययति । १०. भावयति । ११. त्याजयति । १२. शाययति । १३. खादयति । १४. धावयति । १५. विकासयति । १६. संहारयति । १७. कारयति । १८. जागरयति । १९. भाययति । २०. विस्तारयति ।

In Public domain. Digitization Muthulakshmi Research Academy

२१. धारयति । २२. ग्राहयति ।

ii) १. वर्धयति । २. वर्षयति ।
३. स्मृशयति । ४. सर्जयति ।
५. प्रवर्तयति । ६. नर्तयति ।
७. कम्पयति । ८. गमयति ।
९. गर्जयति । १०. दर्शयति ।

iii) १. क्षेपयति । २. उपदेशयति ।
३. प्रवेशयति । ४. मेलयति ।
५. सेचयति । ६. खेदयति ।

iv) १. तोषयति । २. शोषयति ।
३. आरोहयति । ४. बोधयति ।
५. भोजयति । ६. नोदयति ।

v) १. स्थापयति । २. अध्यापयति ।
३. दापयति । ४. यापयति ।
५. स्नापयति । ६. ज्ञापयति ।

vi) १. चोरयति । २. क्षालयति ।
३. ताडयति । ४. पीडयति ।

अभ्यासः - १२

१. खादयति, अन्नं खादयति ।२. कारयति, कार्यं कारयति । ३. लेखयति, चित्रं लेखयति । ४. दापयति, चाकलेहं दापयति । ५. कम्पयति, शाखां कम्पयति । ६. प्रवर्तयति, व्यजनं प्रवर्तयति । ७. स्मारयति, विषयं स्मारयति । ८. चालयति, वाहनं चालयति । ९. वादयति, वाद्यं वादयति । १०. जागरयति, पुत्रं जागरयति । ११. उत्थापयति, छात्रम् उत्थापयति । १२. हासयति, जनान् हासयति । १३. धारयति, शाटिकां धारयति । १४. मेलयति, जलं मेलयति । १५. बोधयति, शिष्यं बोधयति ।

अभ्यासः - १३

१. माता, पुत्री २. माता, पुत्रः ३. स्वामी, पाचकः । ४. सखी, बालिका । ५. स्वामी, कर्मकरः । ६. सः, अहम् । ७. सा, सेवकः । ८. अध्यापकः, छात्रः ।

अभ्यासः - १४

१. वीणा सीमां हासितवती । २. विद्या कमलां रोदितवती । ३. रामः श्यामम् उत्थापितवान् । ४. दिनेशः पितरम् उपवेशितवान् । ५. गोपालः पत्नीं कोपितवान् । ६. सः बालकं भायितवान् । ७. बालिका सखीं पातितवती ।८. बालकः मित्रं रोदितवान् । ९. एषः सेवकम् अनुसारितवान् । १०. अधिकारी कर्मकरम् आटितवान् । ११. विदूषकः जनान् मोदितवान् । १२. धनिकः वाहनं चालितवान् । १३. गीता अन्यं प्रवर्तितवती । १४. दिव्या पुस्तकं नाशितवती । १५. माता शिशुं शायितवती ।

अभ्यासः - १५

१. पिता पुत्रं नगरं गमयति । २. अध्यक्षः कार्यकर्तारम् आपणं गमयति । ३. ग्रामीणः पान्थं ग्रामं प्रापयति । ४. अग्रजः भगिनीं गृहं प्रापयति । ५. रमेशः दिनेशं पत्रालयं गमयति । ६. चालकः बस्यानं ग्रामं गमयति ।

अभ्यासः - १६

१. शङ्करः शिवं विषयं ज्ञापयति ।
२. निर्देशकः सञ्चालकं मार्गं ज्ञापयति ।
३. अध्यापकः बालान् व्याकरणम्

In Public domain. Digitization Muthulakshmi Research Academy

अध्यापयति । ४. गुरुः छात्रं श्लोकार्थं बोधयति । ५. आरक्षकः पान्थं मार्गं ज्ञापयति ।

अभ्यासः - १७

१. माता रुग्णम् अन्नं भोजयति ।
२. भगिनी गोपालं क्षीरं पाययति । ३. पुत्री रुग्णां मातरम् औषधं पाययति । ४. पुत्री वृद्धां यवागूं भोजयति । ५. अग्रजा भग्नहस्तम् अनुजं क्षीरं पाययति ।

अभ्यासः - १८

१. प्रतिनिधिः प्रवाचकं वार्तां श्रावयति ।
२. आचार्यः छात्रं वेदं पाठयति ।
३. अध्यापिका विद्यार्थिनीं गीतं पाठयति ।
४. वेतालः त्रिविक्रमं कथां श्रावयति ।
५. कार्यकर्ता ज्येष्ठम् इतिवृत्तं श्रावयति ।

अभ्यासः - १९

१. पुत्रः जनकं युतकं दर्शयति । २. सखी भगिनीं चित्रं दर्शयति । ३. अर्चकः यात्रिकं देवालयं दर्शयति । ४. गृहिणी प्रतिवेशिनीं शाटिकां दर्शयति । ५. कृष्णः यशोदां विश्वं दर्शयति ।

अभ्यासः - २०

२. ज्येष्ठपुत्रं सायं नगरं प्रापयति ।
३. मध्यमपुत्रं वेदं पाठयति ।
४. पुत्रीं शाटिकां दर्शयति ।
५. अतिथिम् आसने उपवेशयति ।
६. पत्नीं विषयं ज्ञापयति ।
७. सहोदरं गृहे स्थापयति ।
८. कर्मकरं रात्रौ क्षेत्रे आटयति ।
९. अम्बां मञ्चे शाययति ।
१०. जनकम् औषधं पाययति ।
११. कर्मकरीं क्षेत्रं गमयति ।
१२. मातुलानीं गीतं श्रावयति ।

अभ्यासः - २१

२. गृहिणी पौत्र्या पुष्पाणि अवचाययति ।
३. पितृव्या कर्मकरेण उद्यानं सेचयति ।
४. ज्येष्ठपुत्री बालकेन गुरुं नमयति ।
५. पुत्रः कर्मकर्या फेनकं क्रापयति ।
६. वृद्धा पाचकेन रोटिकां पाचयति ।
७. अग्रजः अनुजेन आसन्दं नोदयति ।
८. अग्रजा अनुजया पाषाणं क्षेपयति ।
९. ज्येष्ठपुत्रः पाचिकया क्षीरम् आनाययति । १०. स्नुषा शिशुना अन्नं खादयति । ११. कर्मकरी तरुणेन पत्रं लेखयति ।

अभ्यासः - २२

३. प्रसादः गोविन्देन अतिथिम् आनाययति । ४. प्रसादः सीतां गीतं गापयति । ५. प्रसादः देवनाथं मुख्याध्यापकं दर्शयति । ६. प्रसादः अशोकेन उपाहारं दापयति । ७. प्रसादः बालकैः आसन्दान् वाहयति । ८. प्रसादः अध्यक्षं वेदिकायाम् उपवेशयति । ९. प्रसादः हरिणा इतिवृत्तं लेखयति । १०. प्रसादः केशवं कार्यक्रम-विवरणं ज्ञापयति । ११. प्रसादः श्रीशेन हारं क्रापयति । १२. प्रसादः गीतां श्लोकं वादयति । १३. प्रसादः ललितया धनं प्रच्छयति । १४. प्रसादः बालिकाभिः लताः सेचयति । १५. प्रसादः राधया अवकरान् क्षेपयति । १६. प्रसादः पालकान् कार्यक्रमं दर्शयति ।

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

अस्मत्समीपे उपलभ्यानि

- व्यवहारसाहस्री (कन्नड/आंग्ल/हिन्दी-आवृत्तिः), अभ्यासपुस्तकम्, विभक्तिवल्लरी, शतृ-शानजन्तमञ्जरी, अभ्यासदर्शिनी, सम्भाषणसोपानम्, कालबोधिनी, णत्वणिजन्तम्, सन्देशसंस्कृतम्, गुणनकोष्टकम्, संस्कृतसुलेखावली, बालकेन्द्रम्, सन्धिः, समासः, कारकम्, बालतोषिणी, ललिलबोधिनी, शुद्धिकौमुदी, कौशलबोधिनी, भाषापाकः, इङ्-व्यवस्था इत्यादीनि शैक्षणिकपुस्तकानि ।
- कन्नडसंस्कृतकोषः, हिन्दीसंस्कृतकोषः, आंग्लसंस्कृतकोषः, कन्नडसंस्कृतक्रियापदकोषः, संस्कृतचित्रपदकोषः इत्यादयः शब्दकोषाः ।
- नवरूपकम्, जागरूको भव, कविकोपकलापः इत्यादयः रूपकसङ्ग्रहाः ।
- गीतसंस्कृतम्, गेयसंस्कृतम्, शिशुसंस्कृतम् इत्यादीनि गीतपुस्तकानि ।
- सुगन्धः, पञ्चतन्त्रकथाः, शृण्वन्तु कथामेकाम्, स्पन्दना, व्यूहभेदः अन्याः कथाश्च, प्रेरणादीपः -१ इत्यादयः कथासङ्ग्रहाः ।
- सुभाषितरसः, संस्कारसुधा, बाळदीविगे, मातृचेतन, मित्राय नमः इत्यादीनि संस्कारदायकानि पुस्तकानि । (कन्नडभाषया)
- धर्मश्रीः, सार्थः, अपश्चिमः पश्चिमे, ऋणविमुक्तिः, बाबासाहेब-आप्टे (व्यक्तिपरिचयः), भुवमानीता भगवद्भाषा, दृष्टिदानम्, क्रान्तिवीरः भगतसिङ्घः, युगावतारः, आवरणम् इत्यादयः दीर्घकथाग्रन्थाः ।
- सङ्क्रमणम्, ज्ञाने धर्मः उत प्रयोगे, इदमित्थम्, ज्ञानदीप्तिः, परिवर्तनम्, पूर्णार्द्धं प्रति, संस्कृतभारती, उत्तिष्ठत मा स्वप्त, सप्तदशी, परिष्कारः, हे मनः ! समाश्वसितु इत्यादयः वैचारिककृतयः ।
- Pride of India, Science in Samskrit, Indian Tradition of Chemistry and Chemical Technology, The Physics, ('भारतीयविज्ञानपरम्परा' इति पुस्तकं संस्कृतेन) इत्यादयः आङ्ग्लभाषीयाः विज्ञानग्रन्थाः ।
- सम्भाषणसंस्कृतम्, गीतसंस्कृतम्, शिशुसंस्कृतम्, हितोपदेशकथाः, प्रयोगः, श्रीकृष्ण-जननम्, संस्कृतोज्जीवनम्, गेयसंस्कृतम्, अमरकोषः (समग्रः) इत्यादयः ध्वनिमुद्रिकाः ।
- भाषिका, बालरञ्जिनी, गीतसंस्कृतम्, बालकेन्द्रम्, संवादमाला इत्यादयः सान्द्रमुद्रिकाः । (C.D.Rom)
- भाषाप्रवेशः - १, भाषाप्रवेशः - २, गीताप्रवेशः - १ गीताप्रवेशः - २ इत्येतैः युक्ता अध्ययनपुस्तकमाला ।

एतदतिरिच्य विविधानि संश्लेषकाणि, शुभाशयपत्राणि, भाषाभ्यासाय सज्जीकृतानि वैज्ञानिकांशयुक्तानि च भित्तिपत्राणि इत्यादीनि ।

रू. ७.००

ISBN 978-81-8820-08-6